In Public domain. Digitization Muthulakshmi Research Academy

वाणीं भजत गैर्वाणीम्

मृतसञ्जीवनम्

(नाटकम्)

'गानकलाप्रपूर्ण, संगीतसाहित्यकलानिधि'

विरुदाञ्चितेन

श्रीमता नल्लान् चक्रवर्ति कृष्णमाचार्येण

विरचितम्

(1980 प्रथममुद्रणं तेलुगुलिप्याम्)

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा

चित्तूरु - 517 001

2011

आवृत्तिस्वाम्यं सभायत्तम्] [मूल्यम् रू. 15.00

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्री अरविन्द शिवः

वाणीं भजत गैर्वाणीम्

मृतसञ्जीवनम्

(नाटकम्)

विचक्षणा परीक्षा

II - paper

I - paper

'गानकलाप्रपूर्ण, संगीतसाहित्यकलानिधि'

बिरुदाञ्चितेन

श्रीमता नल्लान् चक्रवर्ति कृष्णमाचार्येण

विरचितम्

(1990 प्रथममुद्रणं तेलुगुलिप्याम्)

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा

चित्तूरु - 517 001

2011

आवृत्तिस्वाम्यं सभायत्तम्] [मूल्यम् रू. 15.00

In Public domain. Digitization Muthulakshmi Research Academy

कृतज्ञताञ्जलिः

भो स्सुहृदः प्रचारकपण्डिताः!

महदिदं प्रमोदस्थानं यत् सभायाः परीक्षासु पाठ्य पुस्तकनां परिवर्तनं कर्तव्य मित्युद्देशेन अचिरादेव पाठ्य पुस्तकनिर्णायकसंघस्य समावेशोऽ भवत्; यत्र च तत्तत्परीक्षोपयुक्ततया केषाञ्चित्पाठ्यपुस्तकानां नियुक्ति रप्यासीत्। तथा च 'मृतसञ्जीवनम्' नाम नाटकं विचक्षण परीक्षायां पाठ्यपुस्तकतया निर्णीतम्।

इदं 'मृतसञ्जीवनम्' नाम नाटकं श्रीमता नल्लान् चक्रवर्ति कृष्णमाचार्यमहोदयेन विरचितं तेलुगुलिप्याञ्च प्रकाशितम्। इदमाकाशवाणीनिलयात्प्रसारितं च। सभापरीक्षा पाठ्यपुस्तकत्वेनेदं नाटकं निर्णेतुं यदाऽस्माभिः आचार्यवर्यः प्रार्थितः, तदा स महोदयः स्वीयाङ्गीकारेण साकं देवनागर्यां पुनर्मुद्रणाधिकार मपि सभायै प्रायच्छत्। उदारोदात्तभावस्य श्रीमतः आचार्यवर्यस्य कृते सविनय प्रणयं कृतज्ञताञ्जलि स्समर्प्यतेऽनया सभया।

प्रकाशनाधिकारी

In Public domain. Digitization Muthulakshmi Research Academy

वक्तव्यम्

भो भो विद्वन्महोदयाः। श्रूयतां ममेयं विज्ञप्तिः। विजयवाटिकाया आकाशवाणीनिलये संगीतशाखायां वायुलीनवादकतया नियुक्तेनाऽपि मया शाकुन्तलप्रभृति संस्कृतनाटकानि बहूनि प्रयुक्तानि। यदा मदुद्योग विरमणकाल स्समासन्नः तदा नाटकरचनायां मे मति रुत्पन्ना। तत्फल मेवेदं 'मृतसञ्जीवनम्' नाम नाटकम्। ततः पूर्वं मया संस्कृतभाषायां कतिचन पद्यात्मकानि काव्यानि च विरचितानि। 'मृतसञ्जीवनं' आकाशवाणी निलया त्प्रसारितञ्च।

एवं स्थिते प्राग्गोदावरी मण्डलान्तर्गत कपिलेश्वर पुर प्रभोः विशिष्य तत्रैव 'श्री सर्वारायहरिकथा पाठशाला संस्थापकस्य महाराज श्रीकस्य S B P B K सत्यनारायणराय महोदयस्य परिचयभाग्यं समजनि।

कथमिति चेत् तस्या मेव पाठशालायां हरिकथा प्रवचने उत्तीर्णा कुमारी डि. उमामहेश्वरी नाम्नी। तया संस्कृतभाषायां हरिकथाप्रवचनं यदि कार्यते तत् श्लाघा पात्रं भवेदिति सत्यनारायणप्रभु स्संकल्पितवान्। तदा स प्रभुः –

In Public domain. Digitization Muthulakshmi Research Academy

मां विज्ञाय कथानिबन्धनचणं गीर्वाणवाण्यामपि
प्रत्यग्रप्रतिभान सुन्दरकथा निर्माण धर्मात्मकं ।
संगीतस्वरमाधुरी विलसितं विद्वन्मनोरञ्जनम्
गैर्वाण्यां क्रियतां प्रबन्धतति रित्यादिष्टवान् स प्रभुः।।

तत्प्रभो रादेशेन वर्षत्रयान्तरे मालविकाग्निमित्रं, मेघसन्देशः वाल्मीकि मनुसृत्य सप्त रामायणकथाः, श्री जयदेवचरितं, त्यागराजचरितं, रघुवंशकाव्य मनुसृत्य रामचरितं इति द्वादश हरिकथारूपेण मया व्यरच्यन्त ।

एतासु कथासु काश्चि दुज्जयिन्यादि स्थलेषु कुमार्या उमामहेश्वर्या प्रायशः कथिताः, अपि च श्लाघिताः । श्रीसत्यनारायणप्रभोः धार्मिकत्व - रसज्ञतादिगुण राकृष्टोऽहं 'याच्ञामोघा वर मधिगुणे' इति मत्वा 'भो प्रभो! मया विरचितं मृतसञ्जीवन नाम नाटकं भवता मुद्रापयितव्य' इति प्रार्थितवान् । प्रभु स्स सद्य एवाऽङ्गीचकार ।

हरिकथारचना समयेषु प्रत्येकं श्री सत्यनारायणराय महोदयः मां यथार्हं पर्यतोषयच्च । प्रथमत स्तस्मै मम कृतज्ञतां निवेदयामि । ततः विजयलक्ष्मी मुद्रणालयाधिकारिणे ब्रह्मश्री काय बुलुसु सूर्यनारायण महोदयाय (भट्नविल्लि) सम्यक् मुद्रित मिति, विशष्य उमा-

In Public domain. Digitization Muthulakshmi Research Academy

महेश्वर्यैं मया दत्तस्य हरिकथा शिक्षणस्य काले सन्निधिं कृत्वा अनुगृह्णद्भ्यः, पण्डितप्रवरेभ्यः, कपिलेश्वरपुर वेदपाठशाला कुलपतिभ्यः ब्रह्मश्री वेदमूर्तिभ्यः तंगिराल बाललगंगाधरशर्मभ्य श्च कृतज्ञता मावेदयामि ।

काव्यस्याऽस्य गुणदोषपरिशीलने सहृदया एव प्रमाणम् ।

विजयवाटिका
4–10–1990

इति बुधजनविधेयः
नल्लान् चक्रवर्ति कृष्णमाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

नाटकपात्राणि

इन्द्रः – (देवराजः) सुराणां राजा

बृहस्पतिः – सुराणां गुरुः

कचः – बृहस्पतेः पुत्रः

शुक्रः – असुराणां गुरुः

वृषपर्वा – असुराणां राजा

देवयाना – शुक्रस्य पुत्री

अमात्यः – वृषपर्वणो मन्त्री

चारः – वृषपर्वणा नियुक्तः

भटः – इन्द्रस्य रक्षकभटः

सूत्रधारः – नाटक प्रयोक्ता

नटी – सूत्रधारस्य सहचरी Helper.

In Public domain. Digitization - Muthulakshmi Research Academy

श्रीनिवासपरब्रह्मणे नमः

मृतसञ्जीवनम्

(नाटकम्)

नान्दी प्रस्तावः

श्रीरञ्जितः कचपरिष्कृत बर्हि बर्हः
इन्द्रस्तुतः प्रणमतां धिषणानुकूलः
शुक्लेतराम्बुदवपुः वृषपर्वकारी
श्रेयस्करः दिशतु वः खगदेवयानः ॥

(नाद्यन्ते सूत्रधारः)

सूत्र – अहो! अभिरूपभूयिष्ठा परिषद्यम्; किमपि वर्णयितुं मां प्रचोदयति।

पक्ष्मक्षेप विवर्जितं कुतुकमन्दोच्छ्वासनिश्श्वासकम्
पृत्यंश प्रतिबोधनाय निगृहीतान्योन्यसम्भाषणम्।
दोषोन्मेष धृतक्षमागुण मभिज्ञात प्रयोगश्रमम्
सोल्लासं रसभावुक सद इदं मोदाय मे कल्पते ॥

In Public domain. Digitization Muthulakshmi Research Academy

अपि च,

सामाजिका स्समयपालन माद्रियन्तः
स्वस्वासनानि खलु नीरव मध्यतिष्ठन् ।
तस्मा द्विलम्बकरणं न हि साधु मन्ये

(परितो विलोक्य)

कस्मा न्नटी चिरयते हयतुल्यधाटी ॥

नटी – (सरभसं प्रविशन्ती) आर्य! माऽस्तु कोपः । इय मह मागताऽस्मि; का हयतुल्यधाटी?

सूत्र – श्रुतं वा? काऽस्ति त्वमेव ।

नटी – (सक्रोधं) समीचीनं, एकान्ते अभिमुखं या सुन्दर-नन्दनवाटी, मन्दहासमौक्तिकपेटी - सैव परोक्ष हयधाटी गजधाटी ।

सूत्र – सखि! क्रुधां मा कृथाः । को दोषोऽस्ति मद्वचने? मन्नियुक्तकार्यस्य शीघ्रकरणे त्व मश्वधाटीति ।

नटी – वाक्यार्थस्य अन्यथाकरणे चतुरः खलु भवान्!

सूत्र – सखि! तत्तथाऽस्ताम् । आवयो र्वाक्कलहेन

In Public domain. Digitization Muthulakshmi Research Academy

सामाजिका भीतद्रुता भवेयुः । अयि शैलूषा
अशेषा स्सन्नद्धाः?

नटी – सर्व मपि सन्नद्धम् । अथ केन पुन र्वस्तुना परिषनटी
दिय माराध्या? कथ्यताम् ।

सूत्र – भो भो सर्वे रपि श्रूयताम् ।

संगीतसाहित्य कलाविमर्द -
प्रौढोऽस्ति नल्लान्कुल कृष्णमार्यः ।
तस्य प्रबन्धो मृतजीवनाख्यो
दृश्य स्स कुर्या त्परिषत्सपर्याम् ॥

नटी – तदावा मपक्रम्य प्रयोगोपक्रमाय रङ्गस्थलं दद्वः ।

सूत्र – सम्यग्भणितम् ।

(इति निष्क्रान्ता)

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमोऽङ्कः

(ततः प्रविशति यथार्हवेषः इन्द्रः)

इन्द्रः – (आत्मगत मिव) चिरकालं सुखसुप्तस्य मे कोऽय मुत्पातः?

राक्षसा रन्ध्र मन्विष्य पतन्ति त्रिदशालये ।
कुलाये काकपाकाना मुलूका इव मत्सरात् ॥

(अत्रान्तरे प्रविशति बृहस्पतिः)

इन्द्रः – (उत्थाय) आचार्य! इन्द्रोऽय मभिवादये ।

बृहस्पतिः – विजयस्व सुत्रामन् ।

इन्द्रः – अवितथाः खलु भवदाशिषः ।

बृह – ननु किल पौरुष मपि प्रधानम् ।

इन्द्रः – ताव दल मिति मन्ये ।

अर्थो वाक्यानुवर्ती चे द्वाक्यं धर्मानुगं यदि ।
धर्मो वेदानुवर्ती चे त्तद्वाक्यानां पति र्भवान् ॥

बृह – भवतु सत्रामन्! अपि विजिता स्सर्वे तवारयः?

इन्द्रः – सर्वे इति? केचिन्निहताः, केचित्पलायिताः, केचिद्बन्दिग्राहं ग्राहिताः ।

In Public domain. Digitization Muthulakshmi Research Academy

बृह – कथ मस्मदनीके?

इन्द्रः – केचिन्निहताः ।

बृह – अहो नु खलु कष्टम्! सर्वथेदं समं मेव । तत स्ततः?

इन्द्रः – जयन्तेन हि सेनाग्रं भेजुषा बहवोऽरयः ।
अप्रधृष्यप्रतापेन प्रापिता यमसादनम् ॥

बृह – युज्यते तव पुत्रस्येदम् ।

(भटः प्रविशति - नेपथ्ये अभिषेणन कलकलः)

भटः – अत्याहितं महाराज! अत्याहितम्! ?

इन्द्रः – उच्यताम् ।

भटः – ये त्वया पूर्वमहिता विहिता विगतासवः ।
त एव साक्षादागत्य क्षोभयन्त्यामरीं पुरीम् ॥

इन्द्रः – न केवल मत्याहितम्, अत्याश्चर्यञ्च! तेन हि मद्वचना दादिश्यन्तां सर्वे दुर्गरक्षाधिकृता स्सेनान्यः "अप्रमत्तै र्भवितव्यम्" इति ।

In Public domain. Digitization Muthulakshmi Research Academy

भटः – यथाऽऽज्ञापयति देवः । (इति निष्क्रान्तः)

इन्द्रः – गुरुब्रह्मन्! किमेतदापतितम्? निहता स्समागता इति कथ मेतत्?

बृह – समधिगतोऽहं ज्ञास्यामि । (समाधिं नाटयित्वा) ज्ञातं ज्ञातम्!

इन्द्रः – कथ मिव?

बृह – कथं नोपपद्यते? सर्वथेदं शुक्राचार्यस्य दर्शनम् ।

इन्द्रः – कथ मेकाक्षिणः?

बृह – सहस्राक्ष! नाऽयं मेकाक्षी; यदि मनुते लोकसंहार-काक्षी । मनसैव मन्त्रयित्वा प्रयोगं नेष्यति खलु ।

इन्द्रः – कथमिव?

बृह – मृतसञ्जीवन्या ।

इन्द्रः – लतया उत पत्रेण वा?

बृह – न लता न च पत्रं वा न किञ्चिदपि पार्थिवम् । बीजाक्षराणि संयोज्य मन्त्रः कश्चित्तदुद्धृतः ।

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रः – तत स्ततः?

बृह – स खलु तन्मन्त्रबलेन निहतान् दितिसुतान् सर्वान् पुन र्जीवयति ।

इन्द्रः – अहो! बत! संशयापतितं मे स्वर्गराज्यम् ।

(भटः पुनः प्रविशति ।)

भटः – विजयो महाराजस्य ।

इन्द्रः – कथमिव?

भटः – हता बहवो राक्षसाः; शिष्टाः कान्दिशीकाः ।

इन्द्रः – कथ मस्मदनीके?

भटः – केचि न्निहिताः ।

इन्द्रः – विजयवार्ताश्रवणेन मृत मपि मे भयं शुक्रवार्ता श्रवणेन पुनर्जीवतीव । आचार्य! चिन्त्यता मुपायः ।

बृह – चिन्तनीय एव ।

(सर्वे निष्क्रान्ताः ।

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयोऽङ्कः

(बृहस्पते राश्रमप्रदेशः। वेदाध्यायी कचकुमारः निमीलिताक्षः 'सहना वव' त्विति सूक्त मधीयानस्तिष्ठति। तदन्तरे इन्द्रः प्रविशति।)

कचः – (नेत्रे उन्मील्य) अहो! देवराजः, स्वागत मिद मस्तु। नाऽनुद्दिष्टप्रयोजना आगच्छन्ति महाजनाः। आस्यताम्।

इन्द्रः – इन्द्रोऽह मभिवादये।

कचः – न, न, कुमारोऽहं खलु; पितरोऽभिवाद्याः।

इन्द्रः – गुरुकुमारोऽप्यभिवाद्यः।

कचः – तत्तथाऽस्ताम्। अपि सर्वे कुशलिनोऽमृतान्धसः?

इन्द्रः – (स्वगतम्) अमृतान्धसः? घृतकोशातकी घृतवत्, (प्रकाशं) कच! अनुद्देश मपि सम्यक् पृष्टं त्वया।

कचः – कि मिव?

इन्द्रः – मृतान्धस इति।

In Public domain. Digttization Muthulakshmi Research Academy

कचः – ननु क्षम्यताम् । महाराज! अवग्रहप्रश्लेष मनालोच्य अश्लीलं भणितं मया । सर्वे सन्त्वमृतान्धसः अमराश्च ।

इन्द्रः – अस्माक प्रमरत्व मद्य भवता सम्पाद्यम् ।

कचः – ननु कथं मया? अद्य?

पुरैव दत्ता किल कूर्मभूमिका
मुपेयुषा मन्थनशैलधारिणा ।
रमाधवेनाऽपि च विश्वमोहिनी
प्रभाजुषा वोहि सुधाऽसुधारिणी ।

इन्द्रः – (स्वगतम्) सत्यम्, पुराणी कथाऽनुसन्धीयते कुमारेण । वेदाध्ययनैकशीलोऽयं न जानातीव प्रकृतामवस्थाम् । (प्रकाशं) तन्नेति न, तेन दत्त मद्य त्वया पुनः प्रतिष्ठाप्यम् ।

कचः – अहो! मर्यादा मत्येति विश्वास आचार्यकुटुम्बे देवराजस्य!

इन्द्रः – पात्रे खलु विश्वासः ।

In Public domain. Digitization Muthulakshmi Research Academy

कचः – किं वा? मम पात्रम्?

इन्द्रः – सुष्ठु पृष्टम्, अद्य समापतिता मापद मपनेतुं मुख्यपात्रेण भवता भवितव्यम् ।

कचः – का वाऽऽपत्? कथं वाऽपनयनम्? किं पात्रम्?

इन्द्रः – श्रुणु कचकुमार!

कचः – अवहितोऽस्मि देवराज!

इन्द्रः – ममेद माधिपत्यं त्रिदिवौकसां जीवितं च त्वय्यायत्त मिदानीम् ।

कचः – कथ्यताम् ।

इन्द्रः – सहजवैरिणः खल्वस्माकं पूर्वदेवाः ।

कचः – बाढं, वैमात्रेयाः खलु ।

इन्द्रः – अमृतमथना त्प्रागेव तेऽस्मास्वाग्रहग्रस्ताः ।

कचः – अस्तु नाम, तया कथयाऽद्य किम्?

इन्द्रः – ननु भणामि; मध्यो काञ्चित्संन्धि मवलम्ब्य अमृतसम्पादनार्थं प्रयतित मस्माभिश्च तैः ।

कचः – ज्ञात मेव ।

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रः – न ज्ञात मिति न; प्रकृतकथानुसन्धानार्थं सर्व मप्यभिधीयते ।

कचः – ततस्ततः?

इन्द्रः – क्षीरोदन्वत्कलशे मन्था मन्दरधराधरस्संजातः ।
राजा रज्जुः फणिनां वय मुभये मथनकर्मणे
परिकल्पिताः ।।

कचः – अहो! वक्तृवैलक्षण्येन श्रुतचराऽपि कथा कुतूहलं मे जनयति; उच्यताम् ।

इन्द्रः – पार्श्वे च वादः प्रमितौ विवादः
ग्राहे च वादः ग्रथने विवादः ।
पादे च पादे च सुरासुराणाम्
परस्परं वाक्कलहो बभूव ।।

कचः – स्थाने हि तत् प्रकृति निकृतिस्थानाम्; ततस्ततः।

इन्द्रः – मध्यस्था कथा तथाऽस्ताम्; अन्ततः कथ मपि सुधा लब्धा; तद्विभजनसमये —

कचः – विदित एव हि कथावशेषः । मायया असुरस्यैकस्य देवगोष्ठीप्रवेशः, चक्रधरेण तच्छिरश्छेदनं, मायाविना मसुराणां सुधानुपलब्धिः

In Public domain. Digitization Muthulakshmi Research Academy.

इन्द्रः – कचकुमार! तत्र तिष्ठ; तेनैव हेतुना प्रवृद्ध-मत्सरा असुरा स्तदा तदा अभिषेणयन्ति स्वर्ग-पुरीम्; बहवोऽस्माभि र्निहन्यन्ते च।

कचः – साधु साधु!

इन्द्रः – न साधुः अस्मादनीकेऽप्यनेके निहन्यन्ते तैः।

कचः – तत्कथम्? सुधाभुजो निहन्यन्त इति।

इन्द्रः – सत्य मेतत्; चिरकालादूर्ध्वं सेवितस्यौषधस्येव अमृतस्य बलं श्लथित मिति मन्ये।

कचः – यदि; तर्हि पुनः क्षीरार्णवो मथयिष्यते; असुरै स्सह सन्धिः।

इन्द्रः – न हि; सिद्धार्था स्ते खलु!

कचः – कथ मिव?

इन्द्रः – एकदर्शनेन तेषा माचार्येण मन्त्रबलेन काचिच्छक्ति स्सम्पादिता। युद्धे निहता नसुरान् स तद्बलेन पुन रुपजीव्य प्रेषयति। ते समरे त्वमराणा मसून् रान्ति।

कचः – कष्टं भोः! त दद्य किं क्रियताम्?

इन्द्रः

कचः

इन्द्रः

कचः

इन्द्रः

कचः

इन्द्रः

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रः – गुरुकुमार! साधु पृष्टं त्वया। संगीतविशेषाभ्यासमिषेण शुक्र स्त्वया शुश्रूषितव्यः।

कचः – देवराज! अपि लभ्यन्ते संगीतेन तिन्त्रिणीफलानि?

इन्द्रः – बाढं, न लभ्यन्त इति लोकोक्तिः। अमृतफल मेव लभ्यत इति शास्त्रोक्तिः।

कचः – तत्त्यागेन खलु!

इन्द्रः – सा उपनिषत्सूक्तिः; संगीतोपनिषत्सूक्ति रित्य न्याऽस्ति। (संगीतं 'याग-योग-त्याग-भोग-फलं ददाति' इति संगीतोपनिषन्मर्मज्ञानां सूक्तिः, अनुभूति श्च।)

कचः – देवराज! अल्पप्रश्नेन मम प्रकृतार्थो दूरमाकृष्टः।

इन्द्रः – न दूर माकृष्टः; शुक्रसान्निध्ये प्रष्टव्याना मभ्यास:इति मन्ये।

शुश्रूषस्व कविं लभस्व च मनुं येनामरै र्भूयते।
सप्राणैर्गुरुपुत्र! गच्छतु भवानागच्छतु स्वस्ति ते॥

In Public domain. Digitization Muthulakshmi Research Academy

कचः – भूमीध्राः विचलन्तु वारिनिधय श्शुष्यन्तु देहार्पणम्।
कृत्वाऽपि त्रिदशेन्द्र शिष्टिमधुना ते पालयामि
ध्रुवम् ॥

इन्द्रः – अवधानेन अवहित्थया च कार्यं साधय ।

कचः – अनुमन्यस्व अदितिसूनो!

(इति निष्क्रान्तौ ।)

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयोऽङ्कः

(शुक्रस्य आश्रमप्रदेशः; वेद मधीयानः तिष्ठति, कचः प्रविशति)

शुक्रः – (जनान्तिकम्) को नु खल्वेष अनुच्छितबालभावः उन्मिषद्यौवनाङ्कुर स्समित्पाणिः रितः एवाभिगच्छति! सविनय मासीदति च माम्। (प्रकाशं) क स्त्वं बाल?

कचः – (कराभ्यां कर्णौ स्पृशन्) बृहस्पति गोत्रापत्यं कचनाम्ना अहं भो! अभिवादये।

शुक्रः – आयुष्मान् भव। (आत्मगतम्) अहो! समुदाचार वेदी! सर्वथा सुराचार्याङ्कुरस्य युक्तरूप मिदम्। (प्रकाशं) अपि कुशली भगवान् बृहस्पतिः?

कचः – बाढम्! पिता मे अत्र भवन्तं सादरं कुशल मनुयुङ्क्ते।

शुक्रः – ननं तस्य भगवतोऽस्मासु तथाविध आदरः। तत्तथाऽस्ताम्। किं नाम तवागमनकारणम्?

कचः – विद्यामर्थयितुम्।

In Public domain. Digitization by Muthulakshmi Research Academy

great

शुक्रः – आश्चर्यमेतत्! कुमारो बृहतां पत्यु विद्यार्थं मत्समीप मागत इति।

कचः – पितु रपेक्षया गुर्वन्तरग्रहणेन विद्यारूढाधिगमा भविष्यतीति पूज्यपितृपादा आमनन्ति।

welcome

शुक्रः – (स्वगतं) अहो! अभिनन्दनीय आशयः। (प्रकाशं) धिषणः खलु तत्र भवान्! अथ का ते रोचते?

case

कचः – या भगवते रोचते। केवल महं प्रणिपतनपरः।

Alone

शुक्रः – भवतु।

अनपेतगन्धः – flowing.

यस्या द्यदेक विषय प्रवणान्तरङ्गः

mind आत्मा च पूर्वजनना दनपेतगन्धः।

तस्मिन् सः एव गुरुणा खलु शिक्षणीयः

नूनं भवे दितरदोषरवृष्टिपातः॥

certainly

कचः – (स्वगतं) अहो! सूक्ष्मज्ञता आचार्यस्य! (प्रकाशं) यद्भवते रोचते; तथाऽपि अत्र भवता मनुशासनेन निवेदयामि। ततो देव एव प्रमाणम्।

byorder

शुक्रः – ननु भण।

In Public domain. Digitization Muthulakshmi Research Academy

कचः – संगीतकलायाः कारकाः प्रत्येकं पूज्यपादा इति श्रूयते ममाऽभिरुचिर्विषयोऽपि सैव। तदनुगृह्णन्तु भवन्तः।

शुक्रः – अहो! निस्संकोचं कथितम्। तदेव ममाभिमतम्; स्थीयताम्। (आत्मगतम्) प्रथमतोऽस्य प्रवृत्तिः परीक्ष्या, तदनु विद्यारम्भः। संगीतं नाम चणकभक्षण मिति सहसाऽऽगता गुरुकुलवासक्लेश मसहमानाः पलायिता भवन्ति केचित्। तदयं परीक्ष्य स्वीकार्यः। (प्रकाशं) अयि कचकुमार! इतः वर्णाश्रमकक्ष्यां प्रविश।

कचः – यदाज्ञापयन्ति देवाः। (स्वगतं) स्थान मुपलब्धम्।

(द्वौ निष्क्रान्तौ।)

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थोऽङ्कः

(वृषपर्वण स्सभा)

अमात्यः – जयतु जयत्वाहवक्षोणिविक्षोभितविपक्षः वृषपर्वा रक्षोऽधिनाथः ।

वृषपर्वा – अमात्यवर! अपि नाम जिता स्सर्वे सुपर्वाणः?

अमा – न हि, निश्शेषं जिताः ।

वृष – बहुवारं प्रचलितेऽपि संयुगे, पुनरुपजीवितेष्वस्माकं बलेषु द्वेषिणो न निश्शेषीकृता इति मे महदाश्चर्यं जनयति ।

अमा – श्रूयतां महाराज!

बाहादर्प विसर्पिभि स्तव बलैः कूर्पासरेणु क्षमं
विक्षिप्ताः परिपन्थिनः क्रतुभुज स्संख्ये त्वसंख्यं त्रय-
स्त्रिंशत्कोटिषु तत्तथाऽपि बलभिन्मुख्या दिगीशा स्स्वयं
नासीराण्यभिचोदयन्ति नितरा मक्षय्य जय्यक्रमैः ॥

वृष – अमात्य! पुनस्सञ्जीवन मनुस्मृत्य श्लथयन्तीव पौरुष मस्म द्रूटाः । परिपन्थिनो विजृम्भन्त इव, एतत्कथ्यताम् ।

In Public domain. Digitization Muthulakshmi Research Academy

सक्रन्दन क्रन्दन विक्रमाढ्याः
कृतान्ततान्ती करणोग्रदन्ताः ।
पाशायुध क्लेशकर प्रकाशाः
रक्षोबले सन्ति न किं प्ररूक्षाः ॥

असा – सन्ति महाराज! सन्ति । तथाऽपि शत्रूणां निश्शेषणं दुस्साध मिव दृश्यते ।

वृष – बत! दुस्साधम् ।

रणाङ्गणे रिपो श्शेषं ऋणशेषं गृहाङ्गणे ।
तद्द्वयं मनस श्शल्यं अनुद्धृत्य कुतस्सुखम् ॥

तदुद्दीप्यतां युद्धोन्मादोऽस्मद्बलेषु, अमात्यवर! विस्मृतं मया । अपि प्रसारितानि चारचक्षंषि?

असा – अथ किं महाराज!

(चारः प्रविशति ।)

चारः – जयतु जयतु महाराजः ।

वृष – अये! चारः वचन एव समागतः! शतायु भव । का नाम वार्ता?

चारः – अस्त्येवाऽस्ति महाराज! महान्विशेषः ।

In Public domain. Digitization by Muthulakshmi Research Academy

वृष – कः क? उच्यताम्। अनिमिषाणा मभित-
मिषाणां प्रयोगः।

चारः – महाराज! स्वपक्षेऽप्यनुमीयते किञ्चित्।

वृष – कथं? कुत्र?

चारः – आचार्य - शुक्रस्योटजे

वृष – आचार्यस्य ? ? ?

चारः – आम् अस्ति किल सकलसद्गुणनिलयः ब्रह्मचर्य
नियमानुचर्या समुपात्त तेजोराशिः उदूढयौवनः
विनयशीलः कचो नाम पुत्रको गिरां पत्युः।

वृष – अस्तु नाम किं न श्छिन्नम्? खलु त्रिदिवालये।

चारः – न शुक्रोटजे; संगीताभ्यासव्याजेन शुक्रमुपस्थाय
तद्धितु र्देवयानाया मन आकर्षतीव सः।

वृष – किं न श्छिन्नम्?

चारः – क्रमशः आचार्यस्याऽप्याकर्षति।

वृष - स सुतां दास्यति; किं न श्छिन्नम्?

अमा – महाराज; सर्व मपि न श्छिन्नम्। शुक्राचार्यो
मृतसंजीवनी सदक्षिणाकं कन्यादानं करिष्यति।

In Public domain. Digitization Mudulakshmi Research Academy

वृष – आः! कष्टम्! आचार्येण नान्वमीयत वा?

अमा – गूहितेङ्गितः कथ मनुमीयते?

वृष – न तथा मन्तव्यम्। पुरा कपटवटु र्वामन आचार्येणानुमितः।

अमा – (अद्य तु शुक्रमौढ्यकाल स्समम्प्राप्तः)। महाराज! मृतसञ्जीवनी विद्यासंग्रहणाय गीष्पतिकृतः प्रयोगोऽय मिति न सन्देहः।

वृष – अमात्य! तदद्य किं क्रियताम्? चिन्तयोपायं सुरगुरो र्मौढ्यं प्रभवति।

अमा – (मन्त्रणं नाटयित्वा सशिरःकम्पं) चिन्तितं महाराज! चिन्तितम्; कर्णे वदाम्यनुमन्यताम्। (इति कर्णे वदति)

वृष – साधवमात्य साधु!

दग्धमूलं निलिम्पानां मायावृक्षं पुनः पुनः।
वासव स्त्वसहस्राक्षिनिस्सृतास्त्रै र्निषिञ्चतु।

(इति निष्क्रान्ता स्सर्वे)

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमोऽङ्कः

(शुक्रस्य आश्रमप्रदेशः, शुक्रः किमपि योजयन् इत स्तत श्चरति ।) (नेपथ्ये)

प्रागद्रा वधिगतसम्भवः प्रवृद्धः
मध्याह्णे द्विगुणित दधितिप्रतापः ।
आकृष्ट स्समुदितरागया प्रतीच्या
पाथोधौ सुरभस मस्त मेति सूर्यः ।।

शुक्रः – (कर्णं दत्वा) अहो! रक्षः कुलसंरक्षा व्यग्रेण मया कालोऽपि न ज्ञायते । सूर्योऽस्त मेति; सायं संध्योपास्या । (इति कमण्डलुं पुरतः कृत्वा प्राणायामार्थं नासिकां निष्पीडय ञ्जपविशति) (ततः प्रविशति पर्याकुलचिता देवयाना)

देवयाना – (जनान्तिकम्) हन्त! नैतावताऽपि कालेन कचःउटजं प्रति निवृत्तः । भगवानंशुमाली चाऽस्तं गतः । केन वा कारणेन चिरयति दयितः? शङ्कते मे हृदयं कीदृगवस्था सम्प्राप्तेति । दक्षिणेक्षणं च मे स्पन्दते! प्रकृतिरूक्षै राक्षसैः किं वा विप्रियं कृतम्? अथवा भवतु; पितर मेव पृच्छामि तावत् । (प्रकाशं) तात! कचो नाजगाम ।

In Public domain. Digitization Muthulakshmi Research Academy

शुक्रः – सुते! आगमिष्यति। (अर्घ्यं प्रददाति)

देव – तात! सूर्योऽप्यस्तं गतः।

शुक्र – श्व उदयिष्यति।

देव – नाऽहं पृच्छामि सूर्यम्।

शुक्रः – आम्, मामेव पृच्छसि खलु!

"इमं मे वरुण श्रुधीहव मद्या च मृडय"

देव – (स्वगतं) अहो! बुद्धिजाड्यं जनकस्य वार्धकस्य प्रथमलक्षण मिदं भवेत्। (किञ्च दुच्चैस्स्वरेण) तात! सूर्यस्योदयास्तमया वधिकृत्य नाऽहं पृच्छामि। किन्तु कचस्यागमनं प्रति।

शुक्रः – किमभवत् कचकुमारस्य?

देव – समित्कुशाहरणार्थं मटवीं गतो नाद्यावधि उटजं प्रति निवृत्तः।

शुक्रः – आगमिष्यति।

देव – न कदाऽपि सन्ध्यावन्दनवेलाऽतिक्रान्ता। अद्यतु-

शुक्रः – अतिक्रान्ता; यदि भवति कालातिक्रमः; अस्ति खलु प्रायश्चितम्।

In Public domain. Digitization Muthulakshmi Research Academy

देव – (किञ्चिदौत्कण्ठ्येन) बत! तात! कचः उटजं न प्रतिनिवृत्तः। राक्षसैः किमपि विप्रियं कृत मिति शङ्कते मे मनः।

शुक्रः – वत्से! माभू रस्थानशङ्किनी; आगमिष्यति।

देव – नहि, तात! पादौ ते गृह्णामि; अन्विष्यतां कचः।

शुक्रः – वत्से! मा भैषीः। अहं मिदं ज्ञास्यामि। (समाधिं नटित्वा ससंभ्रमं) वत्से! महत्कष्टम्! राक्षसैर्मारितः कचः!!

देव – हा! तात! हा हा! कच! (इति मूर्छां गता)

शुक्रः – समाश्वसिहि वत्से! समाश्वसिहि। अहमद्यैव कचं मृतसञ्जीवन्या पुनरुपजीव्यानेष्यामि। (इति नेपथ्ये गत्वा कचेन सहाऽऽगत्य) वत्से! अयं मयं कच स्समागतः; उत्तिष्ठ।

देव – (सहर्षं) आः! कचः!! (स्वगतं) दिष्ट्या जीविताऽस्मि। (कच मुद्दिश्य) कच! किं भवत्ते?

कचः – देवयाने! शृणु। यावदहं समिधस्सञ्चिन्वन्नासम्; तावच्चत्वारो भीकरा वनसूकरा मयि सहसा पतित्वा स्वदंष्ट्राभि र्मां घोरं दंशयितुं प्रवृत्ताः।

In Public domain. Digitization Muthulakshmi Research Academy

देव – कष्टं भोः! तत स्ततः?

कचः – बाधा मसहमानोऽहं 'त्राहि गुरो' इति समाक्रन्दम्। ततः परं न जाने। इदानीं तवाऽग्रे अभवम्।

शुक्रः – सूकरदष्ट इति जनान् विश्वासयितुं तद्रूपधारिणां राक्षसानां कृतोऽयं प्रयत्नः। किन्तु ममाऽक्षिपिधानं न शक्यते। (कच मुद्दिश्य) दिष्ट्या जीवितोऽसि।

कचः – गुरोः प्रसादः। (अञ्जलिं बध्नाति)

शुक्रः – कुमार! सन्ध्या मुपास्व। (दुहितरमुद्दिश्य) वत्से! अद्य कालिक मनुतिष्ठ।

(इति निष्क्रान्ताः।)

(यवनिका पतति। कञ्चित्कालं नेपथ्ये वाद्यसंगीतम्)

(यवनिकापसारणम्)

In Public domain. Digitization by Muthulakshmi Research Academy

(वसन्ततूंदयः, कचदेवयानयोः प्रवेशः)

देव – कच! इतः पश्य ।

कचः – तिष्ठ, शुद्धाः पालाशदण्डा अत्र ।

देव – कच! सर्वदा पालदण्डाः पालाशदण्डाः!! समित्कुशच्छेदना च्छान्तं मनः प्रकृतिसौभाग्य-विलोकनेन किञ्चिद्विनोदय ।

कचः – गुरो में आज्ञा खलु निर्वर्तनीया । निबध्यैतानेष आगच्छामि । (इति पालाशदण्डान् बध्नाति)

देव – कच! इतः पश्य ।

नवनवविकसितपुष्पां, बालतृणाङ्कुरसमुत्थरोमाञ्चाम् ।
सद्यस्समुदितरागां, वनलक्ष्मीं श्लिष्यतीव ऋतुराजः ।।

कचः – ममैवं दृश्यते ।

नवनवविकसितकुसुमैः, बालतृणाङ्कुरसमुत्थरोमाञ्चः ।
सद्यस्समुदितभक्तिः, वनदेवी मर्चयति वसन्तः ।।

देव – (स्वगतं) अये! नर्मगर्ब्याहूति मेऽय मन्यथयति ।
(प्रकाशं कच! इतः पश्य ।

In Public domain. Digitization Muthulakshmi Research Academy

मृणाळिनीचुम्बन रक्तचञ्चुः
प्रसक्तलाक्षारुण पादयुग्मः ।
हंसोऽय मायाति सरः प्रतीरं
संकेतविद्वानिव वल्लभायाः ॥

कचः – देवयाने! मामेवं; ममैवं दृश्यते ।

स्नानं सरस्यम्बुजपत्रनेत्रां
क्रींकार मन्त्राभ्यसनं च कुर्वन् ।
सम्प्राप्तसत्त्वो रजसोऽवशेषं
किञ्चिद्दधानो व्रतसंयमीव ॥

देव – न मह्यं रोचते तथा वर्णनम् ।

कचः – कविकुमारी खलु भवती!

देव – तथाऽऽस्ताम्; गुरुपुत्र! इतो दृश्यताम् ।

सौरभेण नितरां प्रलोभितः
संभ्रमन् रचितझंकृतिस्वनः ।
षट्पदः कमलकोशसंगतः
सम्मदं पिबति तन्मधु द्रवम् ॥

कचः – तदनु दृश्यतां तदवस्था ।

In Public domain. Digitization Muthulakshmi Research Academy

अस्त मेति भगवां स्त्रयीतनुः
सद्य एव मुकुळीभवे न्नळम् ।
निर्गमार्थ मनुपात्तसाधनो
बम्भर स्त्विभकरेण हन्यते ।।

देव – (स्वगतं) कीदृशो वा अय मिति न जाने; भवतु (प्रकाशं) कच! अहं मत्र मदभीष्टदायकं कञ्चिद्देव माराधयामि ।

कचः – को वा स देवः?

देव – शृणु —

आराधयामि मकरध्वज मुत्तमाङ्गम्
आमन्त्रयामि कुसुमस्थगितेन्दुमौलिम् ।
नीराजयामि मनसि प्रभवं निरङ्गम्
सम्प्रार्थयामि दयितग्रहकारणाय ।।

कचः – देवयाने! अहं केतुग्रहशान्त्यर्थं तं प्रार्थयामि । त्वया यः श्लोकः पठितः, तस्मिन् प्रतिपादं षष्ठ सप्तमाष्टमाक्षराणि विहाय पठामि । यदि नव वृत्तं वसन्तलिका मम त्विन्द्रवज्रा शृणु ।

In Public domain. Digitization Muthulakshmi Research Academy

आराधयामि ध्वज मुत्तमाङ्गम्
आमन्त्रयामि स्थगितेन्दुमौलिम् ।
नीराजयामि प्रभवं निरङ्गम्
संप्रार्थयामि ग्रहकारणाय ।।

देव – न सामरस्यं वहसि त्व महो!

कचः – अहो! बृह त्सामरसं वहामि ।

देव – न देवयानाभिमुखो ब्रवीषि ।

कचः – तदेव यानाभिमुखो भवामि ।।

देव – (स्वगतं) सर्व मपि मे वचनं प्रतिषिध्यतेऽनेन; भाषणचातुर्य मिति वा? हृदयाविष्करण मिति वा? अविदितमदन इति वा न ज्ञायते । भवतु क्रमशो वश मानेयः, लालनीयः । (इति पर्याकुला तिष्ठति ।

कचः – देवयाने! आचार्यपादा निरीक्षन्ते । सन्ध्या-वन्दनवेला चेयम्; तावदुटजं प्रति निवर्तावहे ।

(इति निष्क्रान्तौ)

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठोङ्कः

(वृषपर्वा आमात्यश्च प्रविशतः)

अमात्यः – विजयस्व महाराज!

वृष – किं माकाशे?

अमा – मा भूदेवं नैराश्यम् ।

वृष – प्रयत्नवैफल्ये तदेव शरण्यम् ।

अमा – आफलोदयानि खलु कर्माणि ।

वृष – क्षुरप्रेण मुण्डितोऽपि पुन रपि जायते खलु कचः ।

अमा – शतकोटिदारिद्र्याणा मनन्तकोट्युपायाः; अन्वेषणे-क्षणः कृतो मया अस्म द्विपक्षीयः ।

वृष – उच्यता मिद ममात्यवर! ननु शुक्रस्य कथ मादरभाजन मासीदिति महदिद माश्चर्यम् ।

अमा – प्रियदुहितृक आचार्य स्तत्प्रियकरीति नेद माश्चर्यम् ।

वृष – वनमल्लिकाकुसुमपेशला मस्मद्गुरुतनयां नित्याग्नि-होत्रपरतन्त्र स्स वटुः कथ माकर्षति?

In Public domain. Digitization Muthulakshmi Research Academy

अमा – महाराज! नवमल्लिका कच मपेक्षते खलु ।

वृष – कथा किं दूराधिरोहिणी?

अमा – प्रथमे किल सोपाने ।

वृष – द्वितीय सोपनारोहणा त्पूर्वमेव कथाया स्तस्याः पादभङ्गः कर्तव्यः ।

अमा – बाढम् । समयो निरीक्ष्यः । विनयादिशीलैः पितरं वयोरूपाभ्यां दुहितरं सममेव समाकर्षति कचहतकः ।

वृषः – तथा तन्मारणोपाय श्चिन्त्यतां, यथाऽस्मद्गुरुः न शङ्कते, वेत्ति च । सर्वं तस्मिन् प्रतिष्ठित मस्मद्भाग्यम् ।

अमा – बाढं महाराज! तथा मन्त्रयाम्यभ्युपायम् यथा निष्ठुर ब्रह्मचर्यानुष्ठानपटु स्स वटुः अपुनरावृत्तिपद मुपनीयते (स्मृति मभिनीय) आः! महाराज! स्फुरितम्!

वृष – कथ मिवामात्यवर!

अमा – श्रूयतां महाराज! मदिराप्रियः खलु भगवान्

In Public domain. Digitization Muthulakshmi Research Academy

भार्गवः! रहः प्रदेशे कचं निहत्य भस्मीकृत्य-
तद्भस्ममिश्रा मदिरा गुरुणा पाययितव्या।
शुक्रोदारान्तरे स वटु रगस्त्योदरान्तरे वातापि
रिव जीर्येत; कथम्!

वृष – (विकटाट्टहासं कुर्वन्) साध्वमात्य! साधु! स्वयं
कृते गर्ते स्वयमेव पतिता स्सुराः।

अत्यन्त प्रियपुत्र शोकदहना दग्धो विदग्धो गुरुः।
कार्याकार्य विवेकशून्यमनसो नाकौकसः प्रायशः॥

अमा – सिद्धं नन्दनवाटिकाविहरणं रम्भापरीरम्भणम्।
रक्षाबन्धन माश्रिते प्रतिभटे कारागृहे बन्धनम्॥

(इति निष्क्रान्तौ)

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमोऽङ्कः

(शुक्रस्याश्रमप्रदेशः; ततः प्रविशतः शुक्रः देवयानी च)

(नेपथ्ये)

दुर्भाङ्कूर मनोहरां वनधरां मुद्वीक्ष्य लोभं गतः
मात्रादिस्वकुलं विहाय जवतो धावन् वृकस्याननात्।
प्रभ्रष्ट स्तृणचर्वणे कृतमतिः कौलेयकै र्वेष्टितः
दंष्ट्रोग्रैस्सहसा गतै र्विनिहतो हा हन्त सारङ्गकः॥

देव – (सोद्वेगं) तात! कचो नाऽगतः।

शुक्रः – आगमिष्यति।

देव – आगमिष्यत्यागमिष्यतीत्मेव सदा वदति। (स्वगतं) ममोत्कण्ठं नावबुध्यते तातः। सर्व मपि कच-विरहितं शून्य मिव प्रतिभाति मे।

शुक्रः – (स्वगतं) मुग्धा बाला। सदा कच मेव स्मरति। कथं वा न स्फुरति! गूढविप्रिय-कारिणो राक्षसाः। बालो न मायावी। सद्वृत्तेन मा मप्यावजयति बालः। (प्रकाशं) वत्से! चिन्तयालम्। आगमिष्यति। उत्तिष्ठ। गानेन ताव त्किञ्चिदात्मानं विनोदय।

In Public domain. Digitization by Muthulakshmi Research Academy

देव – विना कचं न मे कण्ठे श्रुति रुत्पत्स्यते। यावत्तेनाधारषड्जे स्थायिभावः क्रियते, तावन्मया मूर्छना क्रियते। तात! अपरं च, स तथा गायन्नेव सहसा गान्धारग्राम माश्रित्य गाने मम विवादं कल्पयति।

शुक्रः – स दैवः खलु ग्रामः।

देव – भवतु, विवादकल्पो ग्राम स्स न मे रोचते।

शुक्र – यदि तर्हि मानवाहं षड्जग्रामगान मेवाश्रय। स त्वया पृथग्गान्धारग्रामगान मेव कुरुताम्।

देव – न हि तात! षड्जग्रामे तेन सह यमळगाने मे रुचिः। कचो नागतः, कथमिदानीम्?

शुक्रः – (स्वगतं) हन्त! तपस्विनी बाला संगीतप्रसंगेन किञ्चि द्व्यावर्त्ता। तदह मेत त्प्रसंगेनैवैनां लालयिष्यामि। (प्रकाशं) वत्से! यदि तर्हि वीणावादने रता भव।

देव – तात! कचः (मुग्धं रोदिति)

शुक्रः – बाले! उदधिगर्भान्तिस्थ मपि ते कचं मह मानेष्यामि। मा भैषीः; वादय वीणाम्।

In Public domain. Digitization Muthulakshmi Research Academy

देव – यदाज्ञापयति तातः। (स| विषादं वीणां वादयति। वीणा तन्त्री त्रुटिता) हा तात! त्रुटिता तन्त्री, त्रुटितं च मनः। उत्पातोऽयं किमप्यरिष्टं सूचयति। बिभेमि कचस्य किं वाऽभवदिति। अन्विष्यतां कचः।

शुक्रः – (स्वगतं) नूनं कुमारी भणति। यावदहं ज्ञानदृष्ट्या पश्यामि। (ध्यायति)

न वनेषु - - न कुञ्जेषु, न नदीषु - - ह्रदेषु च।
न गृहासु - - न शृङ्गेषु, न समुद्रेषु दृश्यते ॥

वत्से! महत्कष्टम्! न कुत्राऽपि दृष्टः कचः।

देव – हा! कच! क्व गतोऽसि? का मवस्थां गतोऽसि? (रोदिति)

शुक्रः – वत्से! अल मलं रुदितेन। चिन्तयाम्युपायम्। (स्वगतं) भवतु; यावदह मन्तर्दृष्टिप्रसारेण स्वोदर मपि मार्गयामि। (अन्तर्दृष्टिप्रसारं नाटयति) (स्वगतं) महत्कष्टं खलु संवृत्तम्!

देव – किं तात! तूष्णीं भूयते?

शुक्रः – किं ब्रवीमि वत्से! (सनिश्वासं) मम उदर एव निद्रितः कचः!

In Public domain. Digitization Muthulakshmi Research Academy

देव – हा तात! हा कच! भवदुदरे कथं तात?

शुक्रः – (संसम्भ्रमम्) पश्चात्कथयामि वत्से! प्रथमं तावत् कचो मदुदरा द्वहि नेतव्यः।
(स्वगत मिव)

यद्यर्चितो मया देवो नित्यं त्रेताग्निसंज्ञकः।
स्ववेगं स्थगय त्वद्य कुक्षिस्थो मम पावकः॥

हन्त! सुरापानाभिरुचि व्यसनं मे अवलम्ब्य सिद्धार्थाः खलु राक्षसकितवाः! (सवितर्कं) किमद्य कर्तव्यम्? अहो प्रतिभाति। यावदहं मद्यैव मद्गतं कचं जीवयिष्यामि। (इति मृतसञ्जीवन मन्त्रपठनं नाटयति) मृतसंजीवन्या ममोदरे जीवितः कचः देवयाना मुद्दिश्य) वत्से! त्व मत्रैव तिष्ठ। अद्य करिष्यमाणं कर्म द्रष्टुं त्वं न शक्नोषि। तदहं पश्वा दुपवनं गत्वा कचं पुन रुपजीव्य तवाऽग्रे प्रतिष्ठापयामि।
(इति नेपथ्यं गतः)

(मूर्छिता देवयाना) (नेपथ्ये सूत्रधारः)

In Public domain. Digitization Mu[illegible]lakshmi Research Academy

भो भोः! श्रूयताम् ।

रक्षोभिः खण्डितांग स्सुरगुरुतनयः प्रापितो भस्मरूपं
हालायां मिश्रितो द्राग्जठर पिठरकं भार्गवस्य प्रविष्टः ।
तन्मन्त्रोपात्तजीवः पुनरपि मृतसंजीवनीं प्राप्य तस्मात्
भित्वा निर्गत्य कुक्षिं मृत मसुरगुरुं जीवयामास सद्यः ॥

शुक्रः – (सहर्षं) (कचेन सह प्रविशन्) वत्से! समाश्वसिहि; उत्तिष्ठ । अयमयं कच स्समागतः!

देव – (सहर्षोद्वेलं) दिष्ट्या सनाथाऽस्मि ।

कचः – अयि! सोदरि! देवयाने! ननु भगवता आचार्येणावां खलु सनाथौ । आवां तस्योदरा न्निर्गतौ ।

देव – (स्वगतं) भग्ना मे मनोरथाः, धूर्तकचकः सम्बोधनेनैव ममाशांकुरान् समूल मदहत् । अहं फल मवाप्स्यति । (इति दीना अवाङ्मुखी तिष्ठति)

शुक्रः – कचकुमार! दिष्ट्या जीवितोऽसि । ननु प्रतिपद विप्रिय कारिणां रक्षसां मध्ये न त्वादृशा स्थातव्यम्; ततो निजगृहं गच्छ ।

कचः – महान् प्रसादः । यथाऽज्ञापयति भगवान् ।

(गन्तुमुद्युक्तः)

In Public domain. Digitization by Muthulakshmi Research Academy

शुक्रः – तिष्ठ कचकुमार! मम मृतसञ्जीवनोपदेशं गृहीत्वा गच्छ ।

कचः – उपदिष्टं खलु भगवता ।

शुक्रः – तन्नहि मृतसञ्जीवनम् । तन्मया उपसंहृतं मृतं च सर्वेषा मपि भूतानां मृति रेव प्रकृतिः । कृत्रिमशक्त्या पुनः पुन र्जीविता मपि अनन्त-कालान्तरे मृति रनिवार्या सर्वोऽपि यदि निज-शक्त्या जयति सुख मवाप्नोति । मृतो वा संयुगे वीरस्वर्गसुख मवाप्नोति । अहं चिराय जाने । शक्तिः लोककल्याणकृते विनियोज्या, न तु खलजनानां कल्याणकृते । अपि च, इदानीं प्रभृति मद्यपानं मया निषिध्यते येनाऽह मप्यभवं सम्मूढचेताः मृतश्च । तत् भो भोः! श्रूयताम् ।

बुद्धे र्मोहकरं विपत्परिकरं सत्कीर्तिनाशंकरम्
मानप्राणहरं दशेन्द्रियगुणग्रामप्रभातस्करम् ।
वित्तध्वंसकरं भ्रमेण युगपत् त्रैलोक्यसाक्षात्करम्
श्रोतारोऽद्य निषिद्धचते खलु सुरापानं मया सर्वतः।।

In Public domain. Digitization Muthulakshmi Research Academy

अपि च,

मृतं हि सञ्जीवयतीष्टकामैः
परे तु लोके सुकृतं पुमांसम् ।
अहंस्तु घोरे निरये निपात्य
हिनस्ति शूलै रसुभिः कुठारैः ॥

अपरं च,

धर्मस्सत्यं दया शौचं नीतिः प्रीति र्मृता इमे ।
तेषां सञ्जीवने सर्वे स्पर्द्धन्तां मनीषिणः

एतदेव भवतु मृतसञ्जीवनम् ।
(कचाभिमुखो भूत्वा) कच! इदं ते ममाशासनम् ।
मनसि वपुषि वाक्ये निर्मलत्वं भजेथाः
निज मनुगतधर्मं सन्ततं वर्तयथाः ।
अधिगत मथ शास्त्रं सज्जनेष्वर्पयेथाः
किमपर मनुशास्मि त्वां सदा पातु वेधाः ॥

सर्वं श्रीकृष्णार्पण मस्तु

In Public domain. Digitization Muthulakshmi Research Academy

१ श्नावलिः

1) संगृहणीत – प्रथमाङ्ककथा, द्वितीयाङ्ककथा, तृतीयाङ्ककथा, चतुर्थाङ्ककथा, पञ्चमाङ्ककथा, षष्ठाङ्ककथा, सप्तमाङ्ककथा ।

2) प्रथमाङ्के इन्द्र बृहस्पत्योः संवादेन को वृत्तान्तः ज्ञायते?

3) द्वितीयांके कचकुमारस्य इन्द्रस्य च सम्भाषणेन किं निश्चितम्?

4) तृतीयाङ्के शुक्राचार्य-कचकुमारयोः संभाषणेन के के अंशाः ज्ञायन्ते?

5) चतुर्थांङ्के वृषपर्वणः अमात्यस्य च सम्भाषणेन किं ज्ञायते?

6) पञ्चमाङ्के देवयानाशुक्राचार्ययोः सम्भाषणेन को वा वृत्तान्तो ज्ञायते?

7) पञ्चमाङ्के कचदेवयानयोः संभाषणेन तयो र्मानसिक प्रवृत्तिः कीदृशीति ज्ञायते?

8) षष्ठाङ्के वृषपर्वणः अमात्यस्य च सम्भाषणेन गुरुमौढ्यकाल स्समासन्न इति निरूपयत ।

9) सप्तमाङ्के कचक्रमारस्य पुनः कथ मुज्जीवनं साधितं शुक्राचार्येणेति निरूपयत ।

10) मृतसञ्जीवन नाटकस्य सन्देशः कः? सोपपत्तिकं निरूपयत ।

In Public domain. Digitization Muthulakshmi Research Academy

ससन्दर्भं व्याख्यात —

1) 'नाऽयं मेकाक्षी; मदि मनुते लोकसंहारकाक्षी' – 6

2) 'विजयवार्ताश्रवणेन मृत मपि मे भयं शुक्रवार्ता श्रवणेन पुन र्जीवतीव ।' – 7

3) 'अपि लभ्यन्ते संगीतेन तिन्त्रिणी फलानि?' – 13

4) 'संगीतं 'यागा-योग-त्याग भोग-फलं ददाति' इति संगीतोपनिषन्मर्मज्ञानां सूक्तिः, अनुभूतिश्च ।' – 13

5) 'पितु रपेक्षया गुर्वन्तरग्रहणेन विद्यारूढाधिगमा भविष्यतीति पूज्यपितृपादा आमनन्ति ।' – 16

6) 'संगीतं नाम चणकभक्षण मिति सहसाऽऽगता गुरुकुलवासक्लेश मसहमानाः पलायिता भवन्ति केचित् ।' – 17

7) 'अद्य तु शुक्रमौढ्यकाल स्समप्राप्तः ।' – 21

8) 'दक्षिणेक्षणं च मे स्पन्दते; प्रकृतिरूक्षै राक्षसैः किं वा विप्रियं कृतम्?' – 22

9) 'अहो! बुद्धिजाड्यजनकस्य वार्धकस्य प्रथमलक्षण मिदं भवेत्?' – 23

In Public domain. Digitization Muthulakshmi Research Academy

10) 'सर्वमपि मे वचनं प्रतिषिध्यतेऽनेन; भाषण चातुर्य मिति वा! हृदयाविष्करण मिति वा! अविदित मदन इति वा न ज्ञायते।' -29

11) 'क्षुरप्रेण मुण्डितोऽपि पुनरपि जायते खलु कचः।'

12) 'साध्वमात्य! साधु! स्वयं कृते गर्ते स्वय मेव पतिता स्सुराः।'

13) 'गूढविप्रियकारिणो राक्षसाः। बालो न मायावी, सद्वृत्तेन मामप्यावर्जयति।'

14) 'हा तात! त्रुटिता तन्त्री! त्रुटितं च मनः। उत्पातोऽयं किमप्यरिष्टं सूचयति।

15) 'हन्त! सुरापानाभिरुचिव्यसनं मे अवलम्ब्य सिद्धार्थाः खलु राक्षसकितवाः!'

16) 'अयि! सोदरि! देवयाने! ननु भगवता आचार्येण आवां खलु सनाथौ। आवां तस्योदरा न्निर्गतौ।'

17) 'भग्ना मे मनोरथाः, धूर्तकचकः सम्बोधनेनैव ममा-शाङ्कुरान् समूल मदहत्। अहं फल मवाप्स्यति।'

18) 'तन्न हि मृतसञ्जीवनम्! तन्मया उपसंहृतं मृतं च।'

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

सभा-प्रकाशितानि परीक्षोपयोगीनि पुस्तकानि

१. संस्कृतलेखिनी प्रथमा
२. ,, द्वितीया
३. ,, तृतीया
४. राजकथा
५. शब्दमञ्जरी
६. परिचयपुस्तिका
७. धातुमञ्जरी
८. संस्कृतरचना
९. रघुवंशम् - द्वादशः सर्गः
१०. किरातार्जुनीयम् - प्रथमः सर्गः
११. शिशुपालवधम् - त्रयोदशः सर्गः
१२. समासकुसुमावलिः
१३. सन्धिविवेकः
१४. धातुमञ्जरी - प्रथमः भागः
१५. नीतिचन्द्रिका
१६. नीतिशतकम्
१७. कविजीवितानि
१८. मृतसञ्जीविनी
१९. निबन्धमाला
२०. मेघदूतम्
२१. निबन्धस्तबकम्
२२. गद्यसंग्रहम्
२३. संस्कृतसप्ताङ्गम्
२४. वेणवैणिकी
२५. मुकुन्दमाला
२६. नित्यानुसन्धानम्
२७. विष्णुसहस्रनामतात्त्विकसमीक्षा
२८. गीतसंस्कृतम्